4. ज्ञातुं इच्छुना जिज्ञासुना। एव प्रपित्सुना इत्यस्य विग्रहवाक्यं लिखत।

5. तामवदत् - ताम् + अवदत्। एवं चेत् मानवीमगम्यरूपाम् इत्यस्य विश्लेषणं कुरुत।

**VII अधोदत्ताशययुक्तं श्लोकं चित्वा लिखत - 2**

**दुर्जनसंसर्गापेक्षया सज्जनशत्रुता प्रशस्यतरा**

1. विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्माजितां समीहते नयेन जेतुं जगतीं सुयोधनः।।

2. तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः।।

**VIII सूचनाः अधिकृत्य हरिकथामधिकृत्य लघूपन्यासं लिखत - 5**

सूचनाः - उपज्ञाता - पुराणकथाकथनं - परिष्कृतं रूपम् - पञ्चाङ्गाः - अवतारणे अवश्यघटकाः - वेषविधानम्।

**IX अधोदत्तेभ्यः पारिवारिक व्यक्तिसम्बन्धिनां वाक्यानां पट्टिकां कुरुत - 4**

प्रजातन्तुं मा व्यवच्छेत्सीः, स्वाध्यायान्नप्रमदितव्यम्, धर्मान्न प्रमदितव्यम्, देवपितृकार्याभ्यां न प्रमदितव्यम्।

**X प्रादेशिकभाषायामनुवदत - 5**

भारतस्य इतिहासकाव्यं भवति महाभारतम्। अस्मिन् अष्टादशपर्वभिः कौरवपाण्डवानां कथा सरसं वर्ण्यते। अस्य भीष्मपर्वणि अन्तर्भवति भगवद्गीता। भगवता श्रीकृष्णेन अर्जुनाय कृताः उपदेशा एव भगवद्गीतायाः विषयः। एते उपदेशाः सर्वेषां मानवानां संसारदुःखापनयनाय उपकारकाः भवन्ति।